GOVT OF KARNATAKA

Karnataka School Examination and Assessment Board

II P U C Model Question Paper -01. 2024-25.

SANSKRIT ( 09) ॥ संस्कृतम् ॥

[TIME: 03Hours 00 Minutes.] [Total No of Questions:44.] [Max.Marks:80.]

---

<u>ಸೂಚನೆಗಳು :</u>

೧) ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ **A**,**B**,**C**ಮತ್ತು**D** ಗಳೆಂಬ **4** ವಿಭಾಗಗಳಿವೆ.

೨) ಎಲ್ಲಾ ವಿಭಾಗಗಳೂ ಕಡ್ಡಾಯವಾಗಿರುತ್ತವೆ.

೩)ಎಲ್ಲಾ ವಿಭಾಗಗಳಲ್ಲಿ ಕೇಳಲಾದ ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಗಳನ್ನು ಆಯಾ ವಿಭಾಗಗಳಲ್ಲಿ ಪ್ರತ್ಯೇಕವಾಗಿ ಸೂಚಿಸಿದ ಸೂಚನೆಯಂತೆಉತ್ತರಿಸಬೇಕು.

**<u>Instructions:</u>**

**1) This Question paper consists of four parts as A, B, C and D.**

**2) All parts are compulsory.**

**3) Every part should be answered as per the given instruction for each and every respective part.**

## <u>Part-A.</u>

I.अधो निर्दिष्टानां प्रश्नानाम् उत्तराणि कोष्टकात् उद्धृत्य लिखत । 10 x 01 =10

1. ' अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ' इति वाक्यानुसारेण एतत् कर्म त्रिविधकर्मसु न अन्तर्भवति ।

   अ.नित्यम् । आ.नैमित्तिकम् । इ.स्वार्थम् । ई.काम्यम् ।

2. विक्रमादित्यस्य प्रभावेण राक्षसः एवं प्रभावितः यत् सः__________।

   अ.मनुष्यभक्षणं परित्यजति । आ. मनुष्यभक्षणं न परित्यजति ।

   इ.मनुष्यभक्षणम् अधिकं करोति । ई.समस्त विश्वं पीडयति ।

3. सन्यासिवचनानुसारेण तस्य शिष्याः गङ्गानद्यां लब्धां मञ्जूषाम् आनीतवन्तः, तस्यां मञ्जूषायां एषः आसीत् ।

   अ.राजकुमारः। आ.वणिक् । इ.घोरः वानरः। ई.शिष्यः ।

4. राजकुमारः वाणिजः कन्याम् अनेन विधिना उपयेमे ।

   अ.ब्राह्मविवाहविधिना । आ.दैवविवाहविधिना ।

   इ.आसुरविवाहविधिना । ई.गान्धर्वविवाहविधिना ।

5. ' अथ भगवान् लोकानुग्रहाय कुशली काश्यपः '।अत्र 'काश्यपः' इति शब्देन निर्दिष्टः एषः।

   अ.कण्वः। आ. दुर्वासः। इ. परशुरामः। ई.सोमरातः।

6. ‘ रोटिकायाः अर्धमेव खादित्वा अवशिष्टमर्धं परेद्युः भक्षणार्थं रक्ष ’ इति राणाप्रतापस्य पत्न्याः कथनस्य आशयः एवं वर्तते ।

अ. अर्धं अद्य खादित्वा,अवशिष्टं श्वः भक्षणार्थं रक्ष। आ. अर्धद्वयमपि अद्यैव भक्षय ।

इ. अर्धद्वयमपि श्वः एव भक्षय । ई. अर्धं अद्य न भक्षय,अवशिष्टम् अपि अर्धं श्वः न भक्षय ।

7. गोविन्दस्य अपत्यानि एतावन्ति सन्ति ।

अ.षट् पुत्राः, द्वे पुत्र्यौ । आ. षट् पुत्र्यः, द्वौ पुत्रौ ।

इ.चत्वारः पुत्राः,चतस्रः पुत्र्यः। ई.एकःपुत्रः,एका पुत्री ।

8.“विधिविलसितम्” इति पाठे वज्रकीटप्रसङ्गः कर्णस्य इमं गुणं सूचयति ।

अ. दुर्गुणम् । आ. सहनगुणम् । इ. मननगुणम् । ई. श्रवणगुणम् ।

9.“धेनुसहस्रेषु वत्सः मातरं गच्छति” इति वाक्यानुसारेण कृतं कर्म इमम् अनुगच्छति ।

आ. छात्रम् । आ. अध्यापकम् । इ. कर्तारम् । ई. सुभाषितकारम् ।

10. कृष्णशास्त्रिमहोदयात् चेक् स्वीकर्तुं शिष्यः इमं भावं प्रकटयति ?

अ. सङ्कोचम् । आ. संशयम् । इ. तिरस्कारम् । ई. अहङ्कारम् ।

II. मञ्जूषातः सूक्तं पदं चित्त्वा रिक्तं स्थानं पूरयत । 05x 01 =05

11. i. उत्तरं यत् समुद्रस्य ______ दक्षिणं च यत् ।

ii. यस्य मरणकालः समायातः तस्येन्द्रियाणि______प्राप्नुवन्ति ।

iii. चिरस्य वाच्यं न गतः _____ ।

iv. राणाप्रतापः _______सभाम् आकारितवान् ।

v. वत्स ! ________उन्मील्याद्य पश्य ।

| |
|---|
| गण्यानाम् , प्रजापतिः , हिमवत् , चक्षुषी , ग्लानिं ,आत्मजा |

III. संयोजयत ।                                                                 05 x 01 =05

12. 

| क | ख |
|---|---|
| अ. परिव्राड् | i.कण्वशिष्यः। |
| आ. शार्ङ्गरवः | ii.पापम् । |
| इ. बिल्लाः | iii.कामवशगः । |
| ई. विलासमिव | iv.सरस्वत्याः। |
| उ. किल्बिषम् | v.प्रतापस्य माता । |
| | vi.योद्धारः। |

## Part - B.

IV. द्वित्रैःवाक्यैःसंस्कृतभाषया,कन्नडभाषया,आङ्ग्लभाषया उत्तरं लिखत।(चतुर्णामेव)  04 x 02 =08

13. पञ्चद्वीपानां नामानि लिखत ।

14. विस्मितःराक्षसःविक्रमादित्यं किं पृच्छति ?

15. कीदृशं कुसुमगन्धं अजिघ्रम्  इति महाश्वेता वदति ?

16. सुन्दरः किमर्थं स्वग्रामं त्यक्तवान् ?

17. वज्राख्यः कीटः किं करोति ?

18. सत्पुरुषव्रतं किम् ?

19.बाल्ये शास्त्रिणां संस्कृताध्ययनम् ।

V. पाठनाम उल्लिख्य कःकं प्रति अवदत् इति संस्कृतभाषया लिखत। (चतुर्णामेव)      04 x 02 =08

20. अद्य प्रभृति मनुष्यभक्षणं परित्यज ।

21. अथ लोकानुग्रहाय कुशली काश्यपः ।

22. अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम् ।

23. नैतद्धनं स्वीकर्तुम् अहम् इच्छामि ।

24. तथापि यदि कुतूहलम् , तत् कथयामि ।

25. भवदनुग्रह एव रक्षाकवचम् ।

26. परीक्षार्थम् इतोऽपि समयावकाशः विद्यते ।

## Part - C.

VI. पाठनाम उल्लिख्य श्लोकानाम् अनुवादं कन्नडभाषया/आङ्ग्लभाषया वा लिखत।(द्वयोरेव) 02 x 03 =06

27. अयं तु नवमस्तेषां द्वीपः सागरसंवृतः ।

योजनानां सहस्त्रं तु द्वीपोऽयं दक्षिणोत्तरात् ॥

28. प्रातर्बुद्ध्वा च तत्सर्वं जहास सकलो जनः ।

ननन्द स वणिक् सा च तत्सुता प्राप्तसत्पतिः ॥

29.कुतो धर्मक्रिया विघ्नः सतां रक्षितरि त्वयि ।

तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥

30.विषयामिषलोभेन मनः प्रेरयतीन्द्रियम् ।

तन्निरुन्ध्यात् प्रयत्नेन जिते तस्मिन् जितेन्द्रियः ॥

VII.दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत। (चतुर्णामेव) 04 x 05 =20

31. पुराणेषु भारतं कथं वर्णितम् इति संगृह्य लिखत ।

32. विक्रमादित्यस्य प्रभावेण राक्षसः कथं परिवर्तितः ?

33. "निर्विमर्शा हि भीरवः" इति शीर्षिकां समर्थयत ।

34."शून्या मेऽङ्गुलिः" इति पाठानुसारेण दुष्यन्तस्य पात्रचित्रणं स्ववाक्यैः कुरुत ।

35.महाराणाप्रतापेन अनुभूता कष्टपरम्परा ।

36.कीदृशं मनिकुमारकम् अपश्यम् इति महाश्वेता वर्णयति ?

37. सा शान्तिः इति पाठस्य सारांशं स्ववाक्यैः संगृह्य लिखत ।

## Part - D

VIII. यथानिर्देशं लिखत।(त्रयाणामेव) 03 x 03 =09

38. सन्धिं विभजत/सन्धिं योजयत।(त्रयाणामेव)

भीषणाकृतिः । मयैवम् । सर्वोऽपि ।कश्चित् + आसीत् । क्षितिपः + तथा ।

39. विग्रहवाक्यं लिखत/समस्तपदं लिखत।(त्रयाणामेव)

वस्त्रापणः। उत्कटेच्छा । अनवश्यकम् ।क्रमम् अनुगम्य । धवला कीर्तिः यस्य सः।

40. पदपरिचयं कुरुत।(त्रयाणामेव)

त्यक्त्वा । परिहृत्य । स्नातुम् । निन्दन्ती । प्राप्तवान्।

41. प्रयोगं परिवर्तयत।

अ. देवाः जन्म इच्छन्ति । अथवा आ. वित्तेन धर्मः रक्ष्यते ।

42. अलङ्कारं सलक्षणं निर्दिशत।

अ. मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम्।

अथवा

आ. बाष्पबिन्दुभिः आरचितामिव स्फटिकाक्षमालिकाम् ।

IX. संस्कृतभाषया अनुवदत। 5x1=5.

**43.** ವಾರಾಣಸಿಯು ಗಂಗಾನದಿಯ ದಡದಲ್ಲಿದೆ. ಅದು ದೇವಾಲಯ, ರೇಷ್ಮೆವಸ್ತ್ರ ಮತ್ತು ಘಟ್ಟಗಳಿಗಾಗಿ (ಘಾಟ್) ಪ್ರಸಿದ್ಧವಾಗಿದೆ. ಇದು ಭಾರತದ ಪ್ರಾಚೀನ ನಗರಗಳಲ್ಲೊಂದು. ಇದು ಭಾರತದ ಪ್ರಸಿದ್ಧ ಯಾತ್ರಾ ಸ್ಥಳ. ಎಲ್ಲ ಭಾಗಗಳಿಂದ ಜನರು ಇಲ್ಲಿಗೆ ಬರುವರು. ಅವರು ಗಂಗಾನದಿಯಲ್ಲಿ ಸ್ನಾನ ಮಾಡಿ ವಿಶ್ವನಾಥನ ದರ್ಶನವನ್ನು ಪಡೆದು ತಮ್ಮ ಜನ್ಮ ಸಾರ್ಥಕವಾಯಿತೆಂದು ಭಾವಿಸುವರು.

**Banaras is on the banks of the river Ganga. It is famous for its temple, silk and Ghats. It is one of the most ancient cities. It is a famous pilgrim center in India. People from all parts of the country visit this place. They take bath in the river Ganga, having visited the Vishwanatha temple. They feel that their life is fulfilled.**

X.44. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 4×1=4

पार्वती अप्रतिमा सुन्दरी आसीत् । सा आत्मनः सौन्दर्येण शिवम् आकर्षयितुम् साध्यमिति भावितवती ।अनन्तरं सा यत्र शिवः तपः करोति स्म तत्र जगाम ।यदा सा परमेश्वरं नमति स्म तदा मन्मथोऽपि तत्रागतः। सः आत्मनः धनुषः सम्मोहनास्त्रम् अयोजयत् ।मन्मथः आत्मनः तपसे विघ्नं कृतवान् इति क्रुध्दः शिवः आत्मनः फालनेत्रम् उन्मील्य तं भस्मसात् अकरोत् ।पार्वत्याः इच्छा अपि नष्टा अभूत् ।परन्तु सा उग्रतपसा शिवस्य मनः जितवती ।

प्रश्नाः -

i. अप्रतिमा सुन्दरी का आसीत् ?
ii. मन्मथः कदा आगतः?
iii. मन्मथः स्वधनुषः किम् अयोजयत् ?
iv. पार्वती कथं शिवस्य मनः जितवती ?

*********************